कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/



Acc. NO. ~~108~~ M-1582

Title - मीमांसार्थप्रकाश

Author - केशव लौगाक्षि

Date - ?

Sub - मीमांसा

folio - 31.

Xerox - 65.

K K S U LIBRARY
RAMTEK
441 106
M-1582
Dist Nagpur

Checked 2012

पारः॥फलंचसमुदितद्वयजन्यमतः॥समुदितयोर्व्यापारएकः सिच्यति॥तदेवचपरमापूर्वं॥तदाहुः॥

त

गणेशायनमः॥ श्रीसांब ॥ श्रीबालकृष्णरामचंद्रगुरुभ्यो नमोस्तु ॥ ॐ चराचरमिदं जगद्यदुदरैकदेशस्थि
तं शिरस्थितदिवमंबरं जलधिरंमैरयद्वपुः ॥ शशिद्युमणिलोचनाद्भुतभुगाननादिस्तुतिः परासदनवाह
दिस्फुरत्तनुकापिमूर्तिर्मम ॥१॥ याजुषाम्नायविज्ञेन लौगाक्षिकुलजन्मना ॥ भट्टश्रीकेशवेनासौ मीमां
सार्थः प्रकाश्यते ॥२॥ अथातो धर्मजिज्ञासा ॥ ननु धर्मविचारशास्त्रं नारंभणीयं ॥ नहि स्वाध्यायोध्ये
तव्य इत्यर्थज्ञानायाध्ययनविधिः ॥ वेदाध्ययनेऽर्थज्ञानहेतुत्वस्यान्वयतो सिद्धत्वात् ॥ किंतु स्वर्गायाक्षर
ग्रहणमात्रं विधेयं ॥ एवं च विचारमंतरेणापि शास्त्रार्थस्य समासत्वात् ॥ अध्ययनानंतरमेव गुरुकुला
न्निवर्तितव्यं। एवं च सति वेदमधीत्य स्नायादिति शास्त्रमनुगृहीतं भवति ॥ त्वत्पक्षे त्वधीतेपि वेदे धर्मविचा
राय गुरुकुलाधिवास एव कर्तव्यः तथा च तन्नैरंतर्यं बाध्येतेति चेत् ॥ अत्रोच्यते ॥ यथा दर्शपूर्णमासज
न्यमापूर्वमवघातजन्यस्यावांतरापूर्वस्य कल्पकं ॥ एवमत्रापि क्रतुजन्यमपूर्वं जातं क्रतुज्ञानसाधन
नियमजन्यस्यापूर्वस्य कल्पकं भवति ॥ अन्यथा श्रूयमाणविध्यानर्थक्यापत्तिः ॥ न च विध्युज्जीव्या
त्वसदृष्टफले अर्थज्ञाने संभवत्यदृष्टस्य कल्पयितुमशक्यत्वात् ॥ यदाहुः ॥ लभ्यमाने फले

स्प र्थं २

3

फलकत्वेन॥ विधेस्तु नियमार्थत्वान्नानर्थक्यं भविष्यति॥ पौर्वापर्यविशिष्टसमानकर्तृकसंस्का ३
न्यमिति स्मृतिबाधोपि न भवतीति सर्वं सुस्थं॥ नन्वविचारमंतराध्ययनमात्राद्धर्मज्ञानं भवतीति ध
रशास्त्रमवश्यमारंभणीयमिति दिक्॥ चोदनालक्षणोर्थो धर्मः॥ अर्थो धर्म इत्युक्ते अंगलेपिचैत्यवंदना
दौ चातिव्याप्तिस्तन्निरासाय चोदनालक्षण इत्युक्तं॥ तावदुक्ते विधिगम्ये नरकफलकत्वेनानर्थरूपे श्ये
नाभिचारकर्मण्यतिव्याप्तिस्तद्व्यवच्छेदायार्थ इत्युक्तं॥ यद्यपि श्येनस्य शत्रुवधः फलं न नरकस्तथापि
न्यस्य वधस्य नरकहेतुत्वाद्द्वारा श्येनोऽनर्थः॥ ननु बहूनामग्नीषोमीयपशुहिंसाया अपि वधत्वे
न नरकहेतुत्वं स्यादिति वाच्यं॥ तस्याः क्रत्वंगत्वेन क्रतुफलस्वर्गव्यतिरेकेण फलाभावात्॥ चोदनाशब्दो
विधिमंत्रनामधेयनिषेधार्थवादोपेतमहावाक्यरूपवेदपरो न तु विधिमात्रपरः॥ मंत्रादीनां ध
र्मपरत्वानापत्तेः॥ नन्वर्थवादा धर्मे न प्रमाणं॥ तन्निरपेक्षेणैव विधिना प्रवर्तकज्ञानसंपादनात्॥ वा
युर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयतीत्याद्यर्थवादा अपि वाय
व्यं श्वेतमालभेत भूतिकाम इत्यादिविधिमनपेक्षमाणा भूतार्थमन्वाचक्षाणा न तु अनुष्ठेयं किंचित्प्रति
दयंत इति चेदुच्यते॥ विधिवाक्यं तावत्पुरुषप्रवर्तयितुं विधेयार्थस्य प्राशस्त्यमपेक्षते॥ अर्थवादवा

४

व फल[illegible]वदर्थबोधपर्यवसिताध्ययनविधिपरिगृहीतत्वेन पुरुषार्थमपेक्षन्ते॥ ततः पुरुषार्थपर्यवसितत्व
ध्यपेक्षितप्राशस्त्यलक्षणया समर्पयदर्थवादवाक्यं विधिवाक्येन सहैकवाक्यतामापद्यते॥ प्रा
स्त्यं च गुणातिशयवत्त्वं॥ बलवदनिष्टाननुबंधित्वं तदित्यन्ये॥ मंत्रा अप्यनुष्ठेयार्थस्मारकत्वेन प्रमाणं॥
षामदृष्टार्थत्वमेवार्थस्मरणस्य प्रकारान्तरेण ब्राह्मणादिनापि संभवादिति वाच्यं॥ अर्थप्रत्यायनस्य दृष्ट
योजनस्य संभवे तु बलाददृष्टस्य कल्पयितुमन्याय्यत्वात्॥ ब्राह्मणवाक्यादिना अर्थस्मरणसंभवेपि मंत्रैरेव स्म
मिति नियमांगीकारात्॥ तस्य च नियमस्यौत्सर्गिकत्वात्॥ सोममंत्रेषु दृष्टार्थासंभवाद् दृष्टं प्रयोजनमस्तु॥
क्ताः कर्तव्या इत्याद्याः स्मृतयोपि धर्मेषु प्रमाणं॥ ननु मूलप्रमाणाभावान्नैताः प्रमाणं॥ भावे वा श्रुतिवैयर्थ्य
न्न॥ विमता स्मृतिर्वेदमूला वैदिकमन्वादिप्रणीतस्मृतित्वात्॥ उपनयनाध्ययनादिस्मृतिवत्॥ न च वैय
र्थ्यं॥ अस्मदादीनामस[illegible]षु परोक्षेषु च नानादेशेषु विप्रकीर्णस्यानुष्ठेयार्थस्यैकत्र स्मृतिभिः सं
नत्वात्॥ तस्मादियं स्मृतिर्धर्मे प्रमाणं॥ ज्योतिष्टोमे सदो नामकस्य मंडपस्य मध्ये काचिदौदुंबरी शाखा
ते॥ तस्याश्च वाससा वेष्टनं स्मर्यते॥ औदुंबरी सर्वा वेष्टयितव्येति॥ सेयं स्मृतिः पूर्वन्यायेन प्रमाणं स्यादि
॥ औदुंबरीं स्पृष्ट्वोद्गायेदिति प्रत्यक्षश्रुतिवचनेन स्पर्शो विधीयते॥ न च सर्ववेष्टने स्पर्शः संभवति

5

रानुमानं कालात्ययापदिष्टं ॥ वार्तिककारास्तु ॥ तामध्वर्युर्वाससा वेष्टयतीति प्रत्यक्षश्रुतिमूल
नस्मृतेः श्रुतिबाध्योदाहरणत्वं न युक्तं ॥ एवं च तुल्यकक्षप्रमाणत्वेन विकल्प एव न्याय्यः ॥ वस्तुतो वि
व नास्ति ॥ औदुंबरीपरिवेष्टयितव्येयं तावन्मात्रं स्मृत्युक्ततोक्तं न सर्वेति ॥ न च सर्ववेष्टनाभावेपि परिशेष्ट
शिष्टार्थस्य संपत्तेर्विरोध इति वाच्यं ॥ औदुंबर्यां उत्तरस्तो ष्टहेन तां स्पृष्ट्वा तोरदंडपुरस्तेनोपविश्योद्गायेत्
न च औदुंबरीमध्यस्योत्तरभागे द्वित्र्यंगुलमात्रं स्पृश्यत्वे तदुत्तरार्धेनेत्युत्तरभागे तोमध्ये द्वित्र्यंगुलं
चोत्तरसर्ववेष्टनेपि परिशिष्टार्थसंपत्तेरविरोध इत्याहुः ॥ ज्योतिष्टोमेऽग्निषोमीयस्य पशोः स्तत्रैव
तेवै सर्जनहोमो विहितः ॥ तत्र यजमानपत्नीपुत्रो [illegible] अहतेन वाससा संछाद्य वाससोन्ते स्रुग्दंड
निबध्य जुहोति ॥ तस्मिन्वाससि स्मर्यते ॥ वैसर्जनहोमीयं वासोऽध्वर्युर्गृह्णातीति ॥ सेयं स्मृतिर्लोभैक
स्मृतिवन्मूलत्वेनानुमापनेन प्रमाणमिति प्राप्ते ब्रूमः ॥ दृष्टे सति नादृष्टार्थपरिकल्पना न्याय्या ॥ तदिह
लोभमूलकत्वेनोपपत्तेर्नादृष्टवेदमूलकत्वं कल्पनीयं गौरवादिति होलाकाद्याचारा अपि धर्मे प्रमाणं ॥
कशिष्टैः परिगृहीतत्वेनाष्टकादिवत् वेदमूलकत्वात् ॥ होलाका वसंतोत्सवः प्राच्येषु प्रसिद्धः ॥ दाक्षिणात्यैर्मातु २
न्यां शिष्टाः परिणयंति ॥ सोयमाचारो न प्रमाणं ॥ मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च ॥ समानप्रवरांश्चैव

।आंम्नायस्यं चेरदिति स्मृतिविरोधात् ॥ न च स्मृत्याचारयोर्मूलवेदानुमापकत्वसाम्यात् समबलत्वमेवेति वाच्यं ॥
तिकल्पनद्वारा श्रुतिकल्पकानामाचाराणां द्व्यंतरितप्रामाण्यकानामेकान्तरितप्रामाण्यकस्मृत्यपेक्षया दु-
र्बलत्वात् ॥ उद्भिदा यजेत ॥ बलभिदा यजेत ॥ विश्वजिता यजेतेत्येवं समाम्नायते ॥ तत्रोद्भिदादिपदं धर्मे प्रमा-
णं न वेति संशये ॥ किं प्राप्तं न धर्मे प्रमाणं ॥ कुतः प्रमाणत्वेनाभिमतेषु वेदविभागेषु अनन्तर्भावात् ॥ न श्रुति-
धिः साक्षात्प्रमाणं धर्मे विधायकत्वात् ॥ निषेधश्च धर्मविरोध्यनर्थनिवर्तकत्वेन ॥ अर्थवाद
वौ तु विध्यन्वयेन ॥ तत्र न तावदुद्भिदादिपदं विधायकं भवति ॥ विध्यर्थभावनांशेषु भाव्य-
णेतिकर्तव्यतारूपेषु कस्याप्यप्रतिपादनात् ॥ नापि निषेधः ॥ नञोऽसत्वेन प्रवर्तनानिरो-
धवर्ने[illegible]या अप्रतिपादनात् ॥ नाप्यर्थवादस्स्तुतेर्निन्दाया वा अप्रतिपादनात् ॥ नापि मन्त्रत्वं ॥
[illegible]स्मिन्मंत्रलिंगानामभावात् ॥ तथा चोक्तं ॥ उतमामन्त्रणास्यन्तत्वान्तरूपाण्यभावतः ॥ मं-
त[illegible]माद्यमंत्रतेषां नयुज्यत इति ॥ अग्नये जुष्टं निर्वपामीत्युत्तमपुरुषः ॥ अग्न यशास्विन्यं रासि
त्यामंत्रणं ॥ उर्वीच्युसि वस्यो नासीत्यस्यन्तरूपं ॥ इषे त्वोर्जे त्वेति त्वान्तरूपं ॥ तस्मादप्रमाणमि-
[illegible]मः ॥ विध्यंशे करणेऽनन्तर्भावा[illegible]न्नाप्रामाण्यं ॥ यद्यपि लिङ्पदेन सहोपात्तयजिधात्वर्थ

६

भावनायांकरणं॥तथापिउद्भिदादिपदंयजिनामत्वेनतत्रान्वेति॥उद्भिन्नामकयागेनप
देति॥यजिसामान्यस्यपशुभावनायांकरणत्वाभावात्॥तस्मात्प्रमाणं॥अथोद्भिदायजेतप
स्तादस्योदध्नाजुहोतीतिवद्गुणविधयएवसंतु॥ज्योतिष्टोमानुवादेनखनित्रादिलक्षणगुणमा
नात्॥ननूद्भिदादिनामकर्मविधयइतिचेन्न॥उद्भिन्नामकेनयागेनपशुफलंकुर्यादितिसामा
रण्येनान्वयसंभवेखनित्रेणसाध्योयोयागस्तेनतत्कुर्यादितिवैयधिकरण्येनान्वयस्या
यसात्॥यदिचखनित्रवतायागेनेतिसामानाधिकरण्यंप्रयोज्येत॥तदामत्वर्थलक्षणास्यात्॥दृष्टा
न्तेव्रीहिभिर्यजेतेत्यादिषुद्रव्यविशेषस्याख्यातादिवाक्यानामसंतनिरूढतयानामत्वासंभवाद्गत्यादिध्या
गविधित्वं॥सोमेनयजेतेत्यत्रापिसोमपदस्याप्रसिद्धनामधेयकल्पनातोवरंप्रसिद्धार्थद्रव्यविशेष
मत्वर्थलक्षणाश्रयणं॥सोमवतायागेनेष्टंभावयेदिति॥उद्भिच्छब्दस्यतुप्रसिद्धार्थाभावादुक्तरी
र्मनामधेयत्वमेव॥कर्मनामधेयत्वंनिमित्तचतुष्टयादाश्रियते॥क्वचिन्मत्वर्थलक्षणाभयात्।
भिदायजेतपशुकामइत्यत्रोद्भिच्छब्दस्यखनित्रादिगुणनामत्वेमत्वर्थलक्षणा।अन्यथातस्यया
यासंभवः॥तस्मादुद्भिच्छब्दोयागनामधेयं॥यदिपशूद्देशेनयागस्तदुद्देशेनचोद्भिद्गुणोविधीयते।

चै १

८

वाक्यभेदः॥ क्वचिद्वाक्यभेदभयात्॥ यथा चित्रया यजेत पशुकाम इत्यत्र यागस्य दधिमध्वादि चित्रद्र
व्यफलसंबंधे च विधीयमाने वाक्यभेद इति चित्राशब्दस्य यागनामधेयत्वं॥ न चात्र मत्वर्थलक्षण
द्रव्यविशिष्टयागविधानमेवास्तु तेन न वाक्यभेद इति वाच्यं॥ दधिमधुपयोघृतं धाना उदकं तंडुल
ष्टं प्राजापत्यमिति तेन च द्रव्यस्याविहितत्वेन तदसंभवात्॥ क्वचित्तत्प्रख्यशास्त्रात्॥ यथाग्निहोत्रं जु
ति अत्राग्निरूपगुणस्य प्रापकशास्त्रान्तरसद्भावादग्निहोत्रशब्दस्य कर्मनामधेयत्वं॥ न त्वग्नौ होत्रमस्मिन्नि
सप्तमीसमासो अग्नये होत्रमस्मिन्निति चतुर्थीसमासो वा अग्निरूपदेवताविधानं॥ शास्त्रान्तरवै
य्यर्थापातात्॥ किं तत्र शास्त्रमिति चेत्॥ यदग्नये च प्रजापतये च सायं जुहोतीति सा चैवाहि॥ तदुक्तं॥ न हि तेन च
मंत्रवर्णेन वा पुनः॥ देवताया विधिस्तत्र दुर्बलं तु परं परं इति॥ क्वचित्तद्व्यपदेशात्॥ तस्माद्यथादि
श्येनेनाभिचरन्यजेतेत्यत्र श्येनशब्दस्य कर्मनामधेयत्वं॥ यथा श्येनो निपत्यादत्त एवमयं द्विष
न्तं निपत्यादत्त इत्यनेन श्येनसादृश्येन यागस्यैव स्तुतत्वात्॥ उत्पत्तिशिष्टगुणबलवत्त्वमपि एतन्नाम
धेयत्वनिमित्तं॥ यथा वैश्वदेवेन यजेतेत्यत्र वैश्वदेवशब्दस्य न विश्वदेवदेवतासमर्पकत्वं॥ तप्ते पय
स्यानि सा वैश्वदेव्यामिक्षेत्युत्पत्तिवाक्येनैव देवताविशिष्टयागविधानात्॥ किंतु नामधे

9

गा:

॥नं॥ वस्तु स्तौते ॥ यद्विश्वेदेवाः समयजंत तद्वैश्वदेवस्य वैश्वदेवत्वमित्यर्थवादरूपतत्स
॥ द्विवैश्वदेवेन यजेत इत्यस्य कर्मनामधेयत्वं नतु निमित्तांतरकल्पनं गौरवादिति ॥ इति केशवभट्ट
ते मीमांसार्थप्रकाशे प्रथमः प्रकारः ॥ भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयतैष ह्यर्थो वि
॥ रुवंतु विंयते ॥ द्रव्यादिभ्योऽपूर्वं न तु एव फलसाधनं अहोस्विद्धात्वर्थोऽपूर्वसाधनं सत् एव च फलसा
नमिति संदेहः ॥ द्रव्यादिभ्योऽपूर्वं तिरस्य च फलसाधनं ॥ कुतः फलं हि साध्यमानतासिद्धं साधन
॥ द्रव्यादिकं च तथा ॥ धात्वर्थस्य यत्नेः स्वयं साध्योनसाधनं ॥ तस्मात् द्रव्याद्येव फलसाधनं ॥ अ
॥ फलमपि कारकं द्रव्याद्यपि करणत्वात्तथा कारकमित्यर्थः ॥ न च कारकाणि मिथः संबध्यंते ॥ सम
॥ वितुक्रियया ॥ साचेह प्रत्ययवाच्या भावनैव तेन तयैव फलं संबध्यते ॥ तद्वारेण करणस्यापि
ः फलसंबंधः ॥ तस्यां च भावनायां धात्वर्थस्यैव करणत्वमुक्तं ॥ करणत्वनालाधवात् ॥ एवं च द्रव्या
दीनि हि स्वमेव प्रयोजनं लभ्यंते ॥ अन्यथाऽदृष्टकल्पनाप्रसंगात् ॥ किं च संनिकृष्टप्रत्ययरूपा
॥ त्यर्थः प्रत्ययनाम्न्य भावनया परस्तु सा संबध्यते ॥ द्रव्यादि तु पदांतरेणापातं वाक्येन ॥ श्रुति

वनार्थाः कर्मप्रतिपादकशब्दाः तेभ्यो भावनार्थेभ्यो क्रिया प्रतीयते एषः भावनार्थो विधियते ॥

म्याहुः क्रियसिनिप्रसिद्धं॥ साध्यरूपोपि धात्वर्थः॥ स्वसाधनं निष्पादितः सन्नुपात्तोसेव फलं साध
नस्मात् एव भावनायां करणं॥ का पुनर्भावना॥ अयत्नो भावनेति केचिदाहुः॥ स्पंद इत्य
मयुसाधारणस्तु रासिन्नत्तु विच्छेदे सामान्यं भावने सन्न्य॥ पार्थसारथिमिश्रास्तु धात्वर्थ
करणी भावना॥ धात्वर्थो नाम वस्तु द्वेरूपे॥ एकमक्रियात्मकं सिद्धस्वभावं॥ अपरं तु सर्वं धात्वर्थानु
कारोतीति अस्य पर्यवेयं॥ क्रियात्मकं साध्यस्वभावं मन्यो सादालुकुलमाख्यातप्रत्ययाभिधे
नतु भावनास्वरूपं॥ फलानुकूलो व्यापारो भावनेति नासर्यार्थः॥ स्वच पुरुषस्यो यागः स्वर्गसंपा
दनपरको यागो येन व्यापारेणाभिध्यायते स व्यापारः स्वर्गकृतिरिसेव रूपेणाख्यातेनाभिधेयो भव
यागः॥ करणस्तेनान्वेति॥ स्वर्गः कर्मस्तेन॥ अग्न्याधानप्रयाजाद्यवधातादि व्यापारः प्रधान
पारायप्र-पञ्चः॥ धात्वर्थे फलसाधनत्वसंपादक व्यापारस्यैव भावनापदार्थत्वोक्तेः॥ न हि प्रयाजा
दिं विना यागः फलसाधयितुमिष्टे॥ नन्वेवं यागोपि भावनास्यादिति चेत्कः संशयः॥ न तु निष्पादि
॥ तथाप्यस्यापि फलसाधनतासंपादकस्य भावनात्वे को विरोधः॥ एवं च प्रयत्नस्यापि भाव
नापक्षं परेनस्वीकुर्मः॥ इदमत्राकूतं॥ लिङ्प्रत्ययोभिध्यां भावनां चाभिदधाति॥ लिङुक्ते

लौ

...तत्वेन द्वितीया ॥ तदुक्तं ॥ अभिधां भावनामाहुरन्यामेवलि[illegible]दयः ॥ अर्थात्मभावनात्वन्या
पगेम्यत इति ॥ अभिधा भावनां शाब्दभावनां प्रवर्तनामिति यावत् ॥ अर्थात्मभावना ॥ अ
ना ॥ तत्र प्रवृत्त्यनुकूलो व्यापारोऽभिधा ॥ फलानुकूलो व्यापारोऽर्थभावनेति विवेकः ॥
नकृतान् व्यापारश्च वेदस्यापौरुषेयत्वाच्छब्दनिष्ठः पदार्थांतरमिति चेत् ॥ वस्तुतस्तु परशानपयो
गिनो वा अत्रात्रयविशिष्टभावनाप्रतिपादनंचेत् ॥ प्रवृत्त्यनुकूलव्यापारत्वेनानुगतीकृ
तं धामेव प्रवर्तनास्यात्तु ॥ न त्वर्थांतरं किंचित्तु ॥ अर्थभावना धात्वर्थप्रवर्तनायां विषयत्वेनच
ावना प्रतिपादनरूपायां तस्यां भावना विषयकत्वस्य स्पष्टत्वाच्च ॥ अभिधाविषयीभूतार्थभावना
ज्ञात्रयमपि साध्यसाधनेतिकर्तव्यतारूपमवश्यं प्रसेतव्यं ॥ अ[illegible]न्यथा तस्य प्रतीतौ अर्थभावनाऽभि
षयत्वेनाव मात्रप्रतीतावप्यप्रवृत्तेः ॥ तस्यांचार्थभावनायां यागः करणत्वेनान्वेति ॥ स्वर्गः फ
ध्यत्वेन ॥ प्रयाजाद्यंगजातमितिकर्तव्यतात्वेन ॥ ननु भावनायां यागः कथं करणं प्रसूतभा
व्यःसः ननु तत्साध्य भावनेति चेन्न ॥ यागस्य भावनासाध्यफलकरणत्वेन भावनायामपि क
पश्यारात् ॥ सेयमर्थभावना स्वाध्यायोऽध्येतव्य इत्यनेन विधीयते ॥ तथाहि ॥ अधीते
ध्यायेन यदध्ययसमीहितं तत्र भावयेदिति ॥

भवगतेनलिङादिना प्रवृत्तिं भावयेदिति सैवगम्यते ॥ प्रवृत्तिरूपार्थभावनैव ॥ प्रवृत्तिफलिक्रियायां नाभिधायाम
पि साध्यसाधने निकर्तव्यतारूपं अंशत्रयमपेक्षितं ॥ अन्यथा तस्याः स्वरूपतः फलतश्चाज्ञानात्प्रवृत्तिप्र
वृत्त्यप्रसंगात् ॥ तत्र लिङादिविधिज्ञानं करणं सैवान्वेति यागइवार्थभावनायां ॥ प्रवृत्तिरेव च साध्यं तेन ॥
पर्गइवार्थभावनायां ॥ अर्थवादादिजन्यं प्राशस्त्यज्ञानमितिकर्तव्यतात्वेन ॥ प्रयाजाद्यंगजातमिवार्थभा
भायां ॥ तदुक्तं ॥ लिङभिधा सैव च शाब्दभावना भाव्यं च तस्याः पुरुषप्रवृत्तिः ॥ संबन्धबोधः करणं तदीयं प्र
रोचना चांगतयोपयुज्यते ॥ न च प्रयाजाद्यंगजातं विनायागस्यानुत्पत्तेरस्तु तस्यार्थभावनायामितिकर्त
त्वं ॥ प्राशस्त्यज्ञानस्य तु कथमभिधायां तत्त्वमिति वाच्यं ॥ प्राशस्त्यज्ञानस्य हि इष्टसाधने कर्मणि द्वेषाव
रस्य दृष्टं कर्मत्वियासेः ॥ दृष्टतरे तत्र द्वेषः ॥ प्रवृत्तिं प्रतिबध्नातीति तन्निरसनद्वारा प्रवृत्तिं जनय
स्याभिधायां तत्संभवात् ॥ तत्र प्राशस्त्यांशस्समर्थवादेनैव ज्ञाप्यते असनेतु विधिनैवाभिप्यते ॥
र्थवादे प्राशस्त्यलक्षणं ॥ कथंचिद्यत्र यत्राशो वाचकः शब्दः ॥ तत्रार्थवादा विधिबोध्यप्रवर्त्तना
नियस्तु निषेधवाक्यबोध्यनिवर्त्तनायां उपयुज्यते ॥ निषेधवाक्यैः ॥ प्रवर्त्तनाविरोधिनिवर्त्त
ति पादनात् ॥ विधिस्तु चतुर्धाभिध्यते ॥ उस[illegible] विधि

13

य

द्वितीये विचार्यते ॥ विनियोगविधिस्वरूपन्तु तृतीयाध्यायगोचरः ॥ चतुर्थे तौ षष्ठवर्जेत्र
धि चिंतनं ॥ अधिकारविधिर्नाम षष्ठाध्यायस्य गोचरः ॥ तत्रोत्पत्तिपरो विधिर् पूर्ववि
उत्पत्तिः प्रथमं ज्ञानमिति तद्विदः ॥ स्वरूपमेव नाम कर्मस्वरूपं सेतस्यन्ये ॥ यथा ॥ अग्निहोत्र
ति ॥ आग्नेयोऽष्टाकपालो भवति ॥ सोमेन यजेतेत्यादिः ॥ अग्निहोत्रं जुहोतीत्यनेन कर्मणः स्वरू
नत्र विशिष्टविधाने गौरवात् ॥ मत्वर्थलक्षणापाताच्च ॥ न चैवं सोमेन यजेतेत्यत्रापि गौ
सो विशिष्टविधेन स्यादिति वाच्यं ॥ विनिगमकाभावाज्ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यत्र स्वर
व फलविशिष्टकर्मविधिस्तु सोमेन यजेतेत्यादिस्तु गुणविधिरवचनं तु सोमविशिष्टकर्मविधि
ति वाच्यं ॥ यागस्वरूपाविर्भावकं रूपं यत्रानुयत्नस्य यावदुत्पत्तिविधित्वान्नान्यस्येति सिद्धां
तः ॥ न चैवं दध्ना जुहोतीत्यस्यापि गुणविशिष्टकर्मविधित्वापत्तिरूपश्रवणादिति वाच्यम् ॥ उत्पत्तिवा
क्यान्तराभावेनानन्यगत्या तथाङ्गीकारात् ॥ न च विशिष्टबोधकपूर्वाभावात् ॥ न विशिष्टविधानमिति वा
च्यं ॥ मत्वर्थलाक्षणिकस्य सोमपदस्य तादृशो स्यसत्त्वात् ॥ अन्यथैतद्दोषेण यागस्य तद्वैयर्थ्येन सोम
पदवैभाव्ये वाक्यभेदापत्तेः ॥ इत्थं च सोमवता यागेनेष्टं भावयेदिति वाक्यार्थः ॥ उत्पत्तिविधौ सर्व

ति ३ ष्ट २

६

त्र धात्वर्थस्य करणत्वेनैवान्वयस्य ॥ सर्वसिद्धत्वादिति दिक् ॥५॥ अंगसंबंधबोधको विधिर्विनियोगवि
धिः ॥ यथा ॥ व्रीहिभिर्यजेत ॥ दध्ना जुहोतीत्यादिः ॥ अत्र हि यद्दियागेन अपूर्वं कृत्वा फलं भावयेत व्रीहि
भिरेवेत्यर्थः ॥ तेन यागकरणकापूर्वभावनायां करणतया विधीयमाना व्रीहयो यागस्यापूर्वं प्रकुर
त्वा द्वारेणोपकुर्वंति ॥ कथं तु ॥ अत्र विधौ धात्वर्थस्य साध्यत्वेनान्वयमभ्युपेत्य व्रीहिभिर्यागं भाव
येदिति वान्यार्थ इत्याह ॥ तन्न मनोरमं ॥ सर्वत्र भावनया विधेयत्वाद्धात्वर्थस्य करणत्वेनैवान्वयात् ५
यागभावनाया निर्णीतप्रकारत्वादपूर्वभावनायाश्चानिर्णीतप्रकारत्वात्तत्र कथंभावाकांक्षाया
र्जनेनैतादृग्विधेयः प्रवर्तमानाऽपूर्वभावनायामेव प्रमाणं ॥ अपरः शाब्दः स शब्दार्थ इति लि
॥ ननु यागभावनायां कथंभावाकांक्षास्ति ॥ किं त्वपूर्वभावनाकथंभावाकांक्षैव ॥ तस्यां च
वर्तमानं व्रीहिशास्त्रं यदि यागकर्मकभावनापरं तदा संगतमभिधानं स्यात् ॥ न चैवमत्र
धाराणामिष्ट इति संगतं ॥ अत एव भावनान्वयतः ॥ पश्वादिसाध्योरार्थिकोऽन्वय इति सत्समाधाये
ः तस्मादिदमसमञ्जसमन्यन्निर्णेयं ॥ स्वर्गकामो यजेतेति प्रधानवाक्ये फलभावनैव विधेया ॥ यागेन स्वर्गं भाव

15

पूर्वं विना कालांतरभावि फलं यागः संपादयितुमीष्टे ॥ इत्यपूर्वभावनाप्याक्षेपलभ्या ॥ सा
चोतत्वं दगकरणकत्वेनैव विधेया ॥ अत एव सर्वत्रांगविधौ क्रतूपकार एव भाव्य इति वंदा
यानुपूर्वफले भावनापूर्वभावनयोरविशेष इति प्रकल्पितं कस्यचित्तच्च ॥ एकत्र फलस्य भाव्यत्व
पूर्वस्य भाव्यत्वमिति भेदात् ॥ अत एवापूर्वफलभावनांतर्गतं न तत्पूर्वकर्मकभावनांतर्गतं
समिधो यजतीत्यत्रापि समिद्यागेनापूर्वं भावयेदिति वाक्यार्थः ॥ अपूर्वमेव हि क्रतूपका
र्यते ॥ एवं तनूनपातं यजतीत्यत्रापि तनूनपानयागेनापूर्वं भावयेदिति वाक्यार्थः ॥ पूर्वत्र
यागकरणकत्वेनापूर्वकर्मकभावना ॥ परत्र तु तनूनपादादिकरणकत्वेनापूर्वभावना विधेयेत्येत
यं विशेषः ॥ न च समिधा यागस्य करणत्वबाधायामपूर्वभावनायां करणत्वेन तनूनपात्करणत्वान्तरान्वय इति वाच्यं
ससाक्षी रीं ॥ निगवाक्षी एतानी आदि क्रयविधि समान कुसत्यादितास्त्रानावलं ॥ एतत्र विधाने चाद्
नुवादेन यागः करणविष्यतः इति पक्षेऽव्युत्पत्तु ॥ तथा च श्रीष्ठापि पूर्वतन स होम समर्थलक्षणाप्यावश्यकी ॥ चेति
श्रीष्ठादिभि यागं भावयेदिति वाक्यार्थः ॥ अत एव करणभूतस्यापि च यागस्योत्पत्तिवाक्यावगतकरण
ार्थीक्षिप्त साध्यांशानुवादेन विधीयमाने विगुणेन मते पर्फलक्षणोति नामधेयत्वरणे चालिकं कृतः ॥ ८

रदंतन धेयं ॥ यद्यस्य स्वरूपतो भावना विधेया तत्र धात्वर्थः करणत्वेनान्वेति ॥ यत्र त्वर्थाक्षिप्ता भावनानु
वादेन गुणो विधीयते तत्र व्रीह्यादिकरणत्वेनैव सा विधीयते ॥ न चैकस्याश्चैवानूद्यमानत्वं विधीयमा
नत्वं च कथं ॥ अर्थाक्षिप्त धात्वर्थस्साध्यत्वेन ॥ अनूद्यमानत्वं व्रीह्यादिकरणकत्वेन विधीयमानत्वमित्य न०
विरोधात् ॥ अत एव दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यत्र फलविधौ व्याप्ये योऽष्टाकपालो भवतिनिरस्य
तिवाक्यविहितयागकरणकभावनायां स्वर्गकरणत्वमात्रमपूर्वं बोध्यते न तु यागकरणकत्वमपीति ॥ स
वै द्रव्याविधयो नियमफलतया नियमविधयः ॥ कर्तृदेशकालगुणानामिवार्थाक्षेपे ऐन्द्रव्यमात्रस्य
त्संभवात् ॥ सति तु द्रव्यविधौ यागविशिष्टद्रव्यमाक्षिपति ॥ प्रसक्ताविकल्पेनैवान्यथानुपपत्ति निरासात् ॥
प्राप्ते नियमः फलति ॥ न तु नियमो विधीयते ॥ तदानर्थक्याभावात् ॥ सति त्वेवं यागे व्रीहिनिय
मः प्रतीतेः फलतः ॥ न त्वेवं यवानां स्वस्याप्रामाण्यप्रसङ्गः ॥ नन्विष्टापत्तिः ॥ तथा सत्यष्टदोषप्रसङ्गे कितावि
नैतदिति चेन्न ॥ अनन्यगत्या तस्याङ्गीकारात् ॥ व्रीहियवशास्त्रयोर्नियमार्थत्वे नान्यनिवृत्तिपर्यन्त
व्रीहिशास्त्रप्रामाण्ये यवप्रयोगानुपपत्तेर्यवशास्त्रप्रामाण्ये च व्रीहिप्रयोगानुपपत्तेः पाक्षिकाप्रामाण्य
नाविकत्वस्यासंभावितत्वात् ॥ तदाहुः तुल्यकक्षविकल्पेनौ ना प्रामाण्यं स्वविकल्पित इति ॥ यत्र
नेऽपि सर्वतो बलवती ह्यन्यथानुपपत्तिरिति ॥ किं तद्दोषाष्टकम् ॥ उच्यते ॥ व्रीहिशास्त्रार्थानुष्ठानका

॥ श्चेद्दोषद्वयमापतति ॥ प्रतीतप्रामाण्यापन्नवरक्को दोषः ॥ अप्रतीताप्रामाण्यकल्पनेन च
॥ षुः ॥ कल्पिताप्रामाण्यस्य च शास्त्रस्य पुनः प्रामाण्योपजीवनं विनार्थानुष्ठानासंभवात् तस्यै
कालेतस्मिन्नेव शास्त्रे ऽपरं दोषद्वयं ॥ कल्पिताप्रामाण्यत्यागो निराकृतप्रामाण्योपजीवनं चे ने
वमेकत्रच दोषद्वयापाताश्चप्रकीर्तिता ॥ एतदेवमस्तु ज्येरन्द्वितीयोऽपि पक्षः कल्प्यते ति ।
वैरपि व्रीहियवैर्यागानुष्ठानसंभवात् उभयानुग्रहो भविष्यतीति चेन्मैवं ॥ समर्थः प
परिति पाणिनीयानुशासनात् परस्माद्विधेः समर्थत्वात् ॥ व्रीह्यादिश्रुतिपदिकरस्य च
॥ दिश्रुतिपदिकसापेक्षत्वेन यावापि नोनेविभक्त्यर्थान्वययोगात्त्वा निरपेक्षो यागमेव
हियवानात्मीययाकरणत्वप्रतीतेमिश्रत्वस्यायुक्तत्वात् ॥ किंचादृष्टार्थत्वे सस शा
पायपरिमोक्षेण प्रधानस्यैकाङ्गविधानेन नैराकांक्ष्यप्रतीतेः समुच्चयः स्यात् ॥
ह्यादस्तु प्रदेयद्रव्यैः प्रकृत्वेन दृष्टार्थत्वादेकाङ्गविधानेन नैराकांक्ष्याव
गतेः समुच्चयो न युक्तः ॥ तस्मादुभयार्थपरिग्रहवचनैश्चरोपि उभयनाशापत्तिर्नतु कोपि शा
१ ग ॥ स्त्रार्थेनानुगृहीतो भवति ।

ननु परिसंख्याविधेरपि इतरनिवृत्तिफलकत्वात्तदपेक्षया नियमविधेः को भेद इति चेदयं भेदः। नियमविधौ तावदप्राप्तांशप्राप्तिः फ- १८
लं। ततश्च सर्वदैव तस्य प्राप्तौ इतरनिवृत्तिरर्थतः सामर्थ्यात्। न हि तस्यां तस्य विधेयस्य नियमेन संबंधेनैव कार्यसिद्धौ साधनांतर-
मुपादातुमर्हति। तेन नियमशास्त्रस्य नियमफलकस्येतरनिवृत्तिफलकत्वं। परिसंख्याविधेस्त्विमामगृह्णन्नशनामृतस्येत्य-
श्वाभिधानीमादत्त इत्यस्येतरनिवृत्तिरेव फलं। न हि मंत्रस्याश्वाभिधान्यादाने नियतः प्राप्तिः। उभयत्रैव लिंगानुमितश्रुत्या रशना-
दद्यादित्येवमात्मिकायाः प्राप्तेः। किंतु विशेषः श्रुत्याप्रत्यक्षयाऽनया लिंगेन सामान्यश्रुत्यनुमानाभावेन गर्दभाभिधानीतो मंत्रस्य
नियोगः कस्तुल्यभावान्निवृत्तिरित्येतावत्। तेन साक्षान्निवृत्तिफलको विधिः परिसंख्या। परंपरया निवृत्तिफलको विधिर्नियमविधिः
पंच पंचनखा भक्ष्या इत्यपि नियमविधिः। तथाहि। नात्र पंचनखभक्षणसंस्कार्याः। कार्यानुपयोगित्वात्। न च भक्षणे विधिः संभव-
वे प्राप्तेति[illegible]धिवैयर्थ्यात्। किंतु पंचनखकर्मकं भक्षणमुद्दिश्य तत्र सकृन्नायेन विनियोगभंगं कृत्वा पंचभिः पंचनखैरि-
या शशकः शल्लकी गोधा खड्गः कूर्मश्च पंचमः इति वाक्यावगताः शशकादयो नियम्यंते। न आपि पंचत्वं गणनतः प्राप्तमनू-
न शशकाद्यन्यतरेण भक्षणं कार्यमिति पुरुषार्थोऽयं नियमः। प्रतिग्रहादिना धनार्जननियमवत्। अस्य च नियमविधिं
धिकरणे स्पष्टं वार्तिककारैरेवोक्तं। न हीह परिसंख्या संभवतीत्यादिना। उत्कलमीमांसकास्तु। द्विविधा परिसंख्या
र्थाच्च। तत्राद्या इमामगृभ्णन्नशनामृतस्येत्यश्वाभिधानीमादत्त इति। आद्या पंचनखा भक्ष्या इति भाष्यानुसारेणा-
पंचेतरे पंचनखा न भक्ष्या इत्येवं वाक्यार्थः। दोषत्रयं चानन्यगत्या स्वीक्रियते। तद्यथा। स्वार्थहानं प्रतिषिद्धस्या- र्थ

॥ प्रमाणांतरप्राप्तबलवदनिष्टाननुबंधीष्टसाधनत्वस्य च बाध इति ॥ व्रीहीनवहंतीत्यपि नियमविधिः ॥ तथा
वधित्वं संभवति ॥ अवघातस्य वैतुष्यसाधनताया लोकत एव प्राप्तत्वात् ॥ नन्वव्रीहिस्वरूपसाधनताऽवघातस्य
॥ निरूप्तेष्वेव व्रीहिष्ववघातात् ॥ न च शक्यंते व्रीहयोऽवघातेन संपादयितुं ॥ तस्मान्नियमविधिरेवायं ॥ यस्मिन्ने
नादिकं वैतुष्यसाधनतया प्राप्तं नावघातस्तस्मिन्पक्षे विधीयते ॥ नन्वेवमवघाते वैतुष्यसाधनत्वस्य लोकसिद्ध
त्वानुपपत्तिरिति वाच्यं ॥ नियमलक्षणसंबंधस्यालोकसिद्धत्वात् ॥ लोकतो हि वैतुष्यार्थं कदाचिद्दलनं कदाचि
न्नखं कदाचिदवघात इति प्राप्ते न त्ववघात[illegible]नियमः ॥ नन्वेवं नियमादृष्टं कथं स्यात् ॥ दृष्टत्वात् ॥ अ
बाधे वैयर्थ्यापत्तेः ॥ ननु नियमः कथमवगम्यते ॥ व्रीह्यवघातयोरुद्देश्योपादेयभावादुद्देश्यवाचिना व्रीहिपदेन हि
देयसंबंधयोग्यापावनो व्रीहय उपस्थाप्यमाना उपादेयावघातसंबद्धा अवहंतीत्यनेन बोध्यंत इति ॥ यावदुद्देश्यसंबंधर
पादेयस्य तेन सह नियमोऽत एव व्रीहिपदेऽपूर्वसाधनत्वलक्षण सर्वेषु व्रीहिष्ववघातस्य बोधयितुमशक्यत्वात् ॥ केषु
वद्दलनादिनापि वैतुष्यसंपादनात् ॥ तत्सिद्ध्यायमानेयापूर्वसाधनेषु या[illegible]संकोन्वाइपस्थितेष्ववघातसंबंधः ॥ इयं च व्रीही
ष्वपूर्वसाधनता वैदिकगम्यत्वादपूर्वी नियतक्रियाधीनत्वाच्च नियमापूर्वाख्यां लभते ॥ न हि सा साधनताऽवघातहीनेषु
तच्छक्ति ॥ तथा सत्यऽवघातविधिवैयर्थ्यप्रसंगः ॥ न चावहता व्रीहय एव अपूर्वसाधनमिति अवघातविधिरिति वाच्यं ॥ त
प्यवघातरहितेष्वसाधनता नास्तीति तज्जन्यैव सा ॥ नन्ववघातेर्त्रिछेरकं न हेतुः ॥ अवहत व्रीहीत्वेनापूर्वजनकत्वात् ॥ तथा

वे

बोधयितुं

नं३

वावघातवितुषीकृतव्रीहीसंपादितपुरोडाशजन्याग्नेययागेन समीहितं भावयेदिति वाक्यार्थः पर्यवस्यति॥ न च वघातेनापूर्वसा १९
धनतां भावयेदिति चेन्न॥ अवघातादीनामवच्छेदकत्वेऽपूर्वसाधनताबोधकविधिविरोधापत्तेः॥ तस्मादवघातेनापूर्वसाधनतां
भावयेदित्येव वाक्यार्थः॥ व्रीहिपदं च व्रीहित्वैकार्थसमवाय्येवापूर्वसाधनत्वं लक्षयति॥ तच्च यवेष्वपीति। तेष्वपि सिद्धो यथा लो
नसुवादिषु तेषां सत्यप्याग्नेयापूर्वसाधनत्वे व्रीहित्वैकार्थसमवाय्यपूर्वसाधनता भावेन तदङ्गतापूर्वसाधनतायां व्री
पदशक्यसंबंधाभावेनालक्षितत्वात्॥ इति केचिदाहुः॥ स्वाध्यायोऽध्येतव्य इत्यत्रैवावघातविधावपि लोकसिद्ध एव साध्यसाध
नभावो विध्यर्थः॥ न त्वर्थज्ञानाध्ययनयोः साध्यसाधनभावो लौकिकः॥ नहि अध्ययनार्थज्ञानयोरिति पाठः॥ किंतु लोकसिद्ध एव [illegible]
गार्हस्थ्याश्रयणाच्च न विध्यानर्थक्यं॥ तद्वदिहापि प्रयोजनं नियमो न तु वाक्यार्थ इति॥ एतेनैव कर्तृदेशकालमंत्रद्रव्यादीनि
व्यपि व्याख्यातानि॥ अन्यथानन्तविध्यानर्थक्यापत्तेरिति॥ ननु नास्त्यपूर्वं न च कर्मणश्चिरध्वस्तादपूर्वं विना का
लिस्वर्गजनकता संभव इति वाच्यं॥ धर्म्यंतरकल्पनापेक्षया यागादिकर्मण एव फलपर्यंतस्थायित्वकल्पनौचित्यात्॥
यागध्वंसस्यैव व्यापारत्वं॥ न च प्रतियोगितदभावयोरेकजनकत्वाभावः अप्रयोजकत्वात्॥ महानसमहाह्रदयोर्वह्नितदभाव
ये प्रत्यक्षेऽविषयत्वेन वह्नितदभावयोर्जनकत्वदर्शनाच्च॥ अस्तु वा देवताप्रीतिरेव व्यापारः॥ तत एवैनमिंद्रः प्रजया
पादिभुतः॥ इदं त्वाभ्युपेत्योक्तं॥ वस्तुतस्तु चिरध्वस्तस्यैव यागस्यास्तु फलजनकत्वं॥ ननु चिरध्वस्तस्य कारणत्वे व्यापा
नामिति चेत्॥ किं तत्कारणं यस्यानुपपत्तिः॥ कार्यासन्निकाले विद्यमानत्वं॥ तत्त्वमिति च प्रयोगिनः स्वध्वंस

त्वं ति १

अपूर्वे कल्पितेऽपि तस्यासंभवत्वादवस्थाश्च ॥ कार्योत्पत्तिकालवर्तिव्यापारवत्त्वमिति चेद्व्यापारएवाव्याप्तिः
व्यापारांतरां[illegible]नुसरणेऽनवस्थापतेश्च ॥ तस्मादनन्यथासिद्धनियतपूर्ववर्तित्वं कारणत्वं ॥ तच्च व्यापारं विना
नसेव ॥ अनन्यथासिद्धत्वनियतपूर्ववर्तित्वयोश्चिरध्वस्तेप्यविच्छेदात् ॥ अत्र यद्यामभ कारणत्वमव्यवधानगर्भमेव ॥ अन्य
न्यस्यापि वह्नि कारणत्वापत्तेः ॥ अनादौ संसारे तद्देशतत्समवधानसंभवात् ॥ अव्यवधानं च स्वस्वजन्यान्यतरासमवधा
॥ स्वयं व्यवहितस्य यागादेः स्वर्गं प्रत्यसमवधाननिर्वाहकत्वेनापूर्वसिद्धिः ॥ इदमेव च चिरध्वस्तस्य व्यापारवत्त्व एव कारण
तो विपक्षबाधकं ॥ अत एव यागध्वंसोपि न व्यापारः ॥ तथा सति रासभातिप्रसंगभयेन तदतिरिक्तव्यापारस्यैवाव्यवधा
कत्वात् ॥ यच्चोक्तं देवताप्रीतिरेव व्यापारस्तदयुक्तं ॥ शब्दात्मिकायां तस्यां चेतनधर्मस्यासंभवात् ॥ क्षणिकेन यागेनापूर्वं चेवि
देवताप्रीतेरप्युत्पादासंभवात् ॥ नापि यागस्यैव स्थिरत्वं तदेव हि श्रुतार्थापत्त्या कल्प्यं यत्प्रमाणांतरेण न विरुध्यते न तु साक्षाद्वि
रुद्धं च क्रियात्मकयागस्य चिरस्थायित्वं ॥ तत्सिद्धमपूर्वं ॥ तत्रेदमालोचनीयं ॥ प्रथमं तावत्फलवाक्येन कर्मणः फलसाधन
त्वं बोध्यते ॥ यागेन स्वर्गं कुर्यादिति ॥ ततः कथं क्षणिकेन फलं कर्तव्यमिति अपेक्षायामपूर्वं कल्प्यत इत्युच्यते ॥ ततः कथमपूर्वं तेन क्री
यते इत्यपेक्षायामंगानुष्ठानप्रकारेणेत्युच्यते ॥ ततः पूर्वापरकालवर्तिभिरंगव्यापारैर्विपर्ययीकृतस्य यागस्यापूर्वसाधनत्वं न स्व
रूपेण संभवतीत्यपूर्वांतरमपि कल्प्यते ॥ दर्शपूर्णमासयोस्तु नवापूर्वी स्वीकर्तव्या ॥ दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति फल
वाक्येन कर्मणः फलसाधनत्वं प्रत्याय्यते ॥ तच्च व्यापारं विनानुपपन्नमिति श्रुतार्थापत्त्या पूर्वं कल्प्यत इत्युच्यते तदिदं परमापूर्वं ॥ प
द्वयवर्तिभ्यां समुदायाभ्यां व्यापारं विना नारब्धुं शक्य इति समुदायद्वयजन्यमपूर्वद्वयं कल्प्यते ॥ तत्कथंभावाकांक्षायां ॥ अन्ना ५०

२

22

धानाद्यागोपदेशः॥ ततः पूर्वोत्तरांगसहितेभ्यस्तेभ्यस्तदुत्पत्तिर्न स्वरूपेणासंभवप्रतित्रिकं त्रीणि त्रीण्यपूर्वाणि कल्प्यंते॥
केचित्त्वेवमाहुः॥ प्रतित्रिकमपूर्वत्रिकं। त्रिकद्वयेन चोत्तरांगसहितेन परमापूर्वनिष्पत्तिलाघवादिति॥ न त्वपूर्वांतरद्वयं गौर-
वात् इति॥ ते त्वतिलघवः॥ समुदायापूर्वद्वयान्यथानुपपत्तिप्रसूतार्थापत्तिकस्यापूर्वषट्कस्योपजीव्यविरोधेन समुदायापूर्वद्वयानपवादक-
त्वात्॥ उत्पत्तिसमुदायफलापूर्वाणामुत्तरोत्तरार्थापत्त्यापूर्वषट्कसिद्धिरिति अस्मत्सिद्धांतात्॥ किंचावश्यं समुदायद्वयादपूर्वद्वयं॥ अमावास्या-
ममावास्यया यजेत। पौर्णमास्या पौर्णमास्या यजेतेति श्रवणात्॥ अमावास्यापौर्णमासीशब्दौ हि य एवं विद्वानमावास्यां यजते य
एवं विद्वान् पौर्णमासीं यजते इति वाक्यद्वयानूदितानां समुदायापन्नानामाग्नेयैंद्रदधियागैंद्रपयोयागत्रिकस्य अग्नेयोपांशुयाजाग्नी-
षोमीययागत्रिकस्य च क्रमेण बोधकाविति पौर्णमास्याधिकरणे स्थितं॥ ततश्चामावास्ययेत्यनेन समर्थः परविधिरिति प्रकरणानुसा-
त्तरानुसारित्वान्वेतत्। निरपेक्षाणामाग्नेयादीनां त्रयाणां विधानात्तज्ज्ञाप्यसमुदायापूर्वे कल्प्यते॥ फलं फलापूर्वात्तेषां पौर्णमा-
सीवद्दर्शपूर्णमासाभ्यां यजेतेत्यनेन करणत्वावगमादिति॥ वार्तिकानुसारिणः॥ चतुर्होत्रा पौर्णमास्यामभिमृशेत् संच होत्रामावा-
स्यसाधारण्यागोपदेशात्तत्सिद्धिरिति भयदेवभट्टाः॥ अथ समुदायापूर्वद्वारैव फलसिद्धेः कृतं परमापूर्वेण॥ श्रोतासि॥ समुदा-
र्वे प्रत्येकं समुदायद्वयस्योर्ध्वव्यापारः॥ फलं च समुदितद्वयजन्यमतः समुदितयोर्व्यापार एकः सिध्यति॥ तदेव च परमापूर्वं॥ तेना-
पत्तेरिहापूर्वं पूर्वमेकं प्रतीयते॥ ततः स्थिते द्वये भूयः स्यादपूर्वांतरभ्रमेति॥ अपरे त्वेवं समादधुः॥ दर्शपूर्णमासाभ्यामिति तद्धितार्थ
नीयते सैव वेदगम्याशक्तिरपूर्वमिति गीयते सा च स्वरूपतो वाक्यगम्यापि पुरुषस्य फलयोग्यतारूपेणार्थापत्तिकल्पितशक्ति

बना प विशेषण

गमासाभ्यां यागाभ्यां स्वर्गं भावयेद् इत्युक्ते सेयं विधिशब्देन प्रतीयमानत्वात्॥ कश्चित्तु॥ कर्तुः फलसाधनता फलाय यत्र हि
नक कार्यद्वारा कुविंदस्येव तंतुसंयोगद्वारा पटसाधनतेति व्याप्तेः परमापूर्वसिद्धिः॥ ननु यागानां षट्त्वात् द्वित्वमनुपपन्नं
द्वयपरं द्वित्व॥ नच तौ यागाविति कथं वाक्यार्थधीरिति चेत्सत्यं॥ अतएव समुदायोपसर्जनेन समुदाये वचनायेतो समुदायात्मु
द्वित्वयोगिन इति यावत्॥ यथा सेनादिशब्दायुद्धसाधत्वमेकदेशावच्छिन्नत्वं च प्रवृत्तिनिमित्तमिति हस्त्यहस्यभादिषु पनसामका
प्रवर्तते॥ तथा दर्शपूर्णमासशब्दो दर्शकालयोगित्वं॥ पौर्णमासकालयोगित्वं च पुरस्कृत्य त्रिके त्रिके वर्तते॥ तदेव समुदा
भ्यां यागत्रिकाभ्यामपूर्वात्मना स्थिताभ्यां स्वर्गं भावयेदिति दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति वाक्यस्य निष्कृष्टार्थः॥
त्मता समुदायापूर्वद्वयसाध्या॥ अपूर्वद्वयं चारादुपकारकांगैर्हेतोस्त्यऽपूर्वत्रयसाध्यं॥ तत्रैवं च सत्वसमवायिकांगोपच्छन्नप्रसे
यागत्रयसाध्यमिति नवापूर्वविदर्शपूर्णमासयोः॥ ननु धात्वर्थस्य भावनाविशेषणत्वाद्वस्तु विधेयत्वं॥ गुणद्रव्ययोस्तु कथं तत्॥ नच
योसान्नाय्यस्त्विति वाच्यं॥ अविहितस्यापूर्वसाधनत्वादिति चेन्न॥ धात्वर्थस्यैव गुणद्रव्ययोरपि कारकात्मना भावनाविशेषणत्वात्॥ न
ह धात्वर्थेपि स्वरूपेण भावनाविशेषणं॥ तत्फलरूपत्वात्॥ किंतु कारकत्वेन॥ तच्च लाक्षणिकं॥ गुणद्रव्ययोस्तु श्रौतं॥ तदाहुः॥ वि
धित्वं श्रौतमार्थं त्वनुभावनाकारकाश्रयं॥ ताभ्यां तु व्यतिरिक्तेऽर्थे विधित्वं नैव लभ्यते इति॥ श्रौतं विधिशक्तिप्रतिपाद्यं॥ तच्च भावनायां॥
अर्थे॥ अर्थापत्त्यैवांगत विधिवेद्यं॥ विधित्वं विधेयत्वं॥ प्रयोगप्राशुभावबोधको विधिः प्रयोगविधिः॥ स चांगविध्येकवाक्यतापन्नः॥
प्रधानविधिरेव न तु स्वतंत्रः॥ प्रयोगप्राशुभावोऽनुष्ठीयमानपदार्थानामविलंबापरपर्यायं साहित्यं फलस्वाम्यबोधको विधिरधि

करण

॥द्धेरनूद्यसहस्रदक्षिणाख्यो गुणो विधीयते किंतु कर्मांतराण्येवं नामान्येवं दक्षिणानि विधीयते॥ नामांतरश्रुताव
॥तीयमानस्य बाधकं विना न पोद्यमानत्वात्॥ एवं च संज्ञाश्रुत्या अर्थांतरावगमामा[illegible]त्प्रकरणविच्छेदे जातेऽर्थांतर
तायां बुद्धौ उपनिपतत्सहस्रदक्षिणेन यजेतेति वाक्यं न ज्योतिष्टोमं गंतुमर्हति॥ तस्मात्कर्मांतराणि॥ एवं चाथैष ज्योति
रर्थवत्वं॥ अन्यथा निरर्थकं स्यात्। तेन सहस्रदक्षिणेनेत्येतावतैव ज्योतिष्टोमस्य गुणविधिसिद्धेः॥ एतच्छब्दस्य प्र
न कर्मचखत्वेनाप्युपपद्यत इति सिद्धः कर्मभेदः॥ क्वचित्प्रकरणांतरात्॥ तथा कुंडपायिनामयने मासमग्निहो
॥मासं दर्शपूर्णमासाभ्यां यजेत इत्यादि श्रूयते॥ तत्र नैयमिकाग्निहोत्रादौ मासो विधीयते॥ किंतु प्रकारांतरा
॥तरमेव किमिदं प्रकरणांतरं॥ अप्रकृताभिधानं तदित्यवेहि॥ कथमप्रकृताभिधानं॥ उपसद्भिश्चरित्वेति वचनात्॥ न
नैयमिकस्योपसदः संति॥ तत्र ताश्च मासश्चेत्को गुणः॥ प्राप्ते कर्मणि न शक्यते विधातुमिति कर्मांतरं॥ अत्र वाप्रकृताभि
॥नादेव प्रकरणांतरापरपर्यायाद्भेदः॥ अप्रकृताभिधानं तु गुणादिति न गुणाभेदः॥ वस्तुतस्तु॥ नाप्रकृताभिधानं प्रकरण
॥तरं॥ तथा सति न वाजिभ्यो वाजिनमित्यत्राप्यप्रकृताभिधानादेव भेदः॥ अप्रकृताभिधानं तु पूर्वकर्मासंयोगिना गुणादि
॥ तत्रापि प्रकरणांतरमेव भेदकं स्यान्न गुणाः॥ एकं शब्दांतराभ्याससंज्ञाभिरप्यप्रकृतविषयतैव विधेर्बोध्यते न सा
॥त्कर्मभेद इति सर्वत्रैय सेव भेदकं स्यान्न तु शब्दांतरादि॥ किंतु पूर्वकर्मासन्निधानं प्रकरणांतरं॥ मासाग्निहोत्रं च नैय
॥कोग्निहोत्रासन्निहितमिति तेनेदं प्रकरणांतरं॥ ननु दूरस्थकर्मानुवादेनापि गुणविधिर्दृष्ट एव॥ यथा आहवनीये जु
॥तीत्यत्र जुहोतीति प्राप्तवन्निर्देशादाहवनीयो विधीयते॥ यज्जुहोति तदाहवनीय इति चेत्तस्य सं॥ तत्र स्याहवनीयउपा २२

कारविधिः फलस्वाम्यक्रियाजन्यफलभोक्तृत्वं॥ सचदर्शपौर्णमासाभ्यांस्वर्गकामोयजेतेत्यादिः॥ शब्दांतरेकर्मभेदः कृतानुबंधत्वा
त्॥ कर्मभेदः शब्दांतरादिषट्प्रमाण[illegible]कः॥ तत्रशब्दांतरंयथा॥ यजतिजुहोतिददातीत्यादौ॥ अत्रहिधातुभेदात्प्रती[illegible]धा
त्वर्थभावनाभेदः॥ देवतोद्देशकोहविस्त्यागोयागः॥ देवतोद्देशकाग्न्यधिकरणकहविःप्रक्षेपोहोमः॥ संप्रदानकस्त्यागोदानं॥
क्वचिदभ्यासात्॥ यथासमिधोयजतितनूनपातंयजतीत्यादौ पंचकृत्वोयजतिशब्दोभ्यस्तइतिप्रत्यभ्यासंभावनाभेदः॥ क्वचित्सं
ख्यातः॥ यथातिस्रआहुतीर्जुहोतीतिश्रूयते॥ अत्रसंख्याश्रवणात्कर्मभेदः॥ नचयथैकादशप्रयाजान्यजतीत्यत्रसंख्याश्रवणेपि
भ्यासेनतत्स्मरणात्॥ कर्मैकत्वंतथेहाप्यभ्यासात्संपतिरस्तुनकर्मभेदइतिवाच्यं॥ प्रयाजानांनिर्ज्ञातसंख्यत्वेनश्रुतसंख्याया त॥
भ्यासेनस्मरणेपिप्रकृतेकर्मैक्यस्यानवगमेनवैषम्यात्॥ नचाख्यातस्यसकृच्छ्रवणात्कर्मैकत्वं॥ आख्यातमात्रस्याप्रामाण्यात्॥
विहितवाक्यपदानिप्रयुज्यंतेतावतांसहत्यप्रामाण्याभ्युपगमात्॥ क्वचिद्गुणभेदात्॥ यथाचातुर्मास्येषुतप्तेपयसिदध्यानयति
मामिक्षेतियागंविधायाम्नायते॥ वाजिभ्योवाजिनमिति॥ अत्रवाजिनंगुणोनपूर्वस्मिन्नेवामीक्षायागेविधीयते उत्पत्तिशि
मीक्षावरुद्धकर्मणिवाजिनस्योत्पन्नशिष्टगुणस्यासंभवान्निवेशनात्॥ तस्माद्वाजिनगुणकंकर्मांतरंवाजिदेवताकं॥
र्मणिसंभवान्निवेशोगुणस्तेनकर्मभेदः॥ यदध्नाजुहोतिपयसाजुहोतीत्यादिषुश्रूयमाणानांनानागुणानामन्यतराना
नाग्निहोत्रवाक्यमात्रालोचनान्निर्गुणस्यकर्मणोऽवत्तस्यसर्वगुणयोग्यत्वात्सौवैपर्यीभावाच्चान्यावरुद्धेऽन्यस्यानि
[illegible]भावात्तत्रैवनानागुणविधानं॥ प्रामाण्ययोस्तुल्यबलत्वाद्दधिपयसोर्विकल्पः॥ क्वचित्संज्ञाभेदात्॥ यथाज्योतिष्टो
मतो॥ अथैषज्योतिरथैषविश्वज्योतिरथैषसर्वज्योतिरेतेनसहस्रदक्षिणेनयजेतेति॥ अत्रहिनप्रकृतमेवज्यो॥ [illegible]

हि

देयोऽत्र कालेऽनुपादेयो गुणः॥ यत्र हि वाक्ये ऽनुपादेयो देशकालादिको गुणः॥ श्रुतो न तत्र दूरस्थकर्मोपस्थानसंभवः॥ यत्तु कुर्या २५

दित्येवंरूपप्रासवन्निर्देशे तु दूरस्थकर्मोपस्थानसंभवत्येव तथा च नित्याग्निहोत्रे ऽहवनीयस्य गुणत्वे विधानसंभवेऽपि न मास

स्य गुणत्वेन विधानं तस्यानुपादेयगुणत्वात् इति मासगुल्कं कर्मांतरमेवेति दिक्॥ पर्यवसितं कर्मभेदनिरूपणं॥ ॥भेद

प्रसंगात्प्रयोगभेदो चिंत्यते॥ दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति काम्यप्रयोगं विधायाम्नायते॥ यावज्जीवं दर्शपूर्णमासाभ्यां

यजेतेति॥ सोऽयमभ्यासः किं कर्मार्थ उत नित्यपुरुषार्थः॥ पूर्वपक्षे काम्यस्यैव प्रयोगस्याभ्यासविधिः॥ सिद्धांते तु प्रयोगांतरं नि

त्यं विधीयते॥ तत्र कर्मांगविधौ प्रकरणानुग्रहः॥ पुरुषार्थविधौ च प्रकरणबाधः स्यात्॥ अतोऽभ्यासविधिर्यावज्जीविकोऽयाग लं

भ्यसेदिति प्राप्ते ब्रूमः॥ एवं हि जीवनवाचिना शब्देन संबधकालो लक्षणीयो यजिना चाभ्यास इति लक्षणाद्वयं स्यात्॥ न

कं॥ जघन्यत्वात्॥ तस्माज्जीवनेन निमित्ते पुरुषस्य तत्संवायपरिहाराय दर्शपूर्णमासप्रयोगो विधीयते इति सिद्धं॥ इदम

त्र॥ शाखांतरेषु किमग्निहोत्रादि कर्म भिद्यते किं वा सर्वशाखास्वेकमेवेति॥ किं तावत्प्राप्तं विशेषः पुनः श्रुतिलक्ष

णासाद्दूरत्वत्लक्षणाच्च॥ प्रकरणांतरादेस्तथा गुणादपि॥ क्वचिद्धि आग्नेयमेकादशकपालं निर्वपेदिति श्रुतं॥ क्वचिद्द्वा

पालमिति॥ अत्र ब्रूमः॥ पुनः पुनः श्रुत्या तावद्धि भेदः सिध्यतु न कर्मभेदः॥ नन्व विधिभेदे कर्मभेदो भिद्यते विहितस्य पुन धी

र्योगादिति वाच्यं॥ शब्दभेदस्यार्थभेदाप्रयोजकत्वात्॥ विहितस्यापि पुरुषांतरं प्रति पुनर्विधिसंभवात्॥ एकादशद्वा

पोस्तूभयोरपि उभांति शिष्टत्वान्न बलाबलं॥ किंतु विकल्प एव तस्मादभेदः॥ इदमपि चिंत्यतां किं पूर्णमास्याममावा

विधिकाथितस्कार

धी

मारब्धं कर्मैकमेवाहोस्विद्भिन्नं॥ तत्राग्नेयोऽष्टाकपालोमावास्यायां पौर्णमास्यां चाच्युतो भवतीति कालद्वय
र्यां च पृथक् निवेशितत्वात्कर्मभेद इति रावणकाचार्याः॥ पार्थसारथिमिश्रास्तु कर्मैक्यमाहुः॥ तदभिप्रायस्तु॥ का
न सर्वास्वकर्मानुबंधिविशेषणं किंतु प्रयोगानुबंधि॥ तेन कालभेदात्प्रयोगभेदमात्रं न तु कर्मभेद इति॥ ॥इति
त्रावभट्टविरचिते मीमांसार्थप्रकाशे द्वितीयः परिच्छेदः॥ ॥अथातः शेषलक्षणं॥ तत्र पारार्थ्यं शेषत्वं॥ अंग
यावत्॥ उपकारकत्वं शेषत्वमिति वादरिः॥ तान्यंगानि द्विविधानि॥ सिद्धरूपाणि क्रियारूपाणि च॥ तत्राद्यानि॥ जा
ादीन्यदृष्टार्थान्येव॥ क्रियारूपाण्यपि द्विविधानि॥ सन्निपत्योपकारकाणि आराद्युपकारकाणि च॥ तत्र कर्मांग
आसु द्रव्यविधीयमानानि॥ सन्निपत्योपकारकाणि॥ एतान्येव सामवायिकानीत्युच्यंते॥ द्रव्यदेवतासंस्काररू
पाणि॥ द्रव्यं पुरोडाशादि॥ देवतान्वनुध्येतराद्वान्या॥ संस्कार अवघातप्रोक्षणादयः॥ तत्रावघातादि दृष्टार्थमेव॥ प्रोक्षणा
द्यदृष्टार्थमेव॥ हविःपुरोडाशादि तु दृष्टादृष्टार्थमेव॥ तत्र यागांशे नादृष्टं॥ दृष्टं देवतास्मरणादि तु॥ स्वतः यच्चोभयार्थ
मेतासामपि कर्मेति यावत्क्रियते॥ स्वातंत्र्येण विधीयमानान्याराद्युपकारकाणि॥ यथा प्रयाजानुयाजादीनि॥ अत्र सन्निपत्योपका
रकाणि न यागस्वरूपमात्रे उपयुज्यंते॥ तैर्विनापि यागोत्पत्तिसंभवात्॥ किंतु यागस्यातींद्रियफलसाधनस्वरूपे वा
यागस्य तेनैव रूपेण समीहितत्वात्॥ स्वरूपेण त्वनिष्टत्वात्॥ तदेवं चोदनैकस्य श्रेयःसाधनत्वमपूर्वं नाम॥ आराद्यु
पकारकाणि तु यद्यपि यागादुत्पत्स्यपूर्वे नोपयुज्यंते॥ सामवायिकेभ्य एवावश्यकेभ्यस्तदुत्पत्तेः॥ उत्तरकालोत्पन्ने १२

प्ते ७

र्थं संपादक २८

भ्रमतेस्तदुत्पन्नत्वसंभवाच्च॥ तथाप्युत्पत्त्यपूर्वोत्पत्त्युपयोगिभ्यां नांतेषां यागसाधनत्वेनावगतानां यागस्य फलोपधाय-
कत्वं येन रूपेण भवति तादृशं स्वरूपं। तदेव च परमापूर्वमिति गीयते॥ नन्वेवमुत्पत्त्यपूर्वं वैयर्थ्यमिति वाच्यं॥ यागस्य स्वरूपतोऽन-
रत्वात्॥ न च तैरंगैरुपकाराधानासंभवात्॥ तस्मादुत्पत्त्यपूर्वातिरिक्त एव यागस्वरूपे तैरुपकार आधातुं न शक्यत इति तत्स्वीकारः॥ उत्पा
अपि चोत्पत्त्यपूर्वाभावे सामवायिकांगानां वैयर्थ्यं स्यात्॥ न च तेषामपि परमापूर्वर्ति॥ अवघातपुरोडाशादीनां चिरविनष्टत्वेन प-
रमापूर्वोत्पादकत्वासंभवात्॥ स च उपकारो यागगत इत्येकः पक्षः॥ आत्मन्येव स उपकारः परं तु यागेन सहैकार्थसमवायाद्यागोप- आत्म
रकं इत्युच्यते॥ फलेभ्यः प्राग्योग्यस्य कर्मणः पुरुषस्य वा॥ योग्यता शास्त्रगम्या या सा परमापूर्वमुच्यत इति॥ वार्तिकस्य पक्षः इ-
ष्टं मतं॥ पुनरंगानि द्विविधानि॥ भासुपयोगीनी भुतोपयोगीनि च॥ तत्राद्यानि प्रधानस्वरूपभावीनि॥ तेषामपूर्वोत्पत्त्युपयोगः
प्रधानोत्तरभावीनि॥ तेषां चादृष्टवस्थितावुपयोग इति दिक्॥ तत्र शेषत्वं श्रुत्यादिषट्प्रमाणकं॥ स्वार्थप्रयोजनेऽन्यानपेक्षः
थव्रीहीनवहंति ग्रह संमाष्टीत्यादौ द्वितीया॥ इमं हिलिरे पक्षे व्रीह्यादीनामवघातादिजन्यफलशालित्वं बोधयति॥
दशेषित्वं प्रतिपादयति॥ अयं विभागो द्वितीयो शेषविभक्तेरेव॥ तथा संप्रदाने चतुर्थ्यपि॥ यथा मैत्रावरुणाय दंडं प्रयच्छतीति॥
र्थे चतुर्थ्यपि॥ यथा सर्वेभ्यः कामेभ्यो दर्शपूर्णमासाविति॥ इतरास्तु शेषविभक्तय एव॥ पशुना यजेत इत्यत्र तृतीयया पशोर्या
॥ यथारुणयैकहायन्या पिंगाक्ष्या गवा सोमं क्रीणातीति॥ इत्यत्र अपरिच्छिन्नत्वेनारुण्यादिगुणानां क्रयांगत्वं पदानामर्थ
र्थोऽलिंगं॥ यथा बर्हिर्देवसदनं दामीत्यस्य मंत्रस्य लवनार्थप्रकाशकतया बर्हिर्लवने विनियोगः प्रतीयते॥ तद्द

द मे

29

॥ पदसमभिव्याहृतपदसमूहो वाक्यं॥ यथा॥ देवस्य त्वा सवितुप्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये त्वा जुष्ट
॥ त्यत्र समवेतार्थतया चरमभागस्य लिंगान्निर्वापे विनियोगप्रतीतेरेकवाक्यतापन्नस्य देवस्येत्यादेः समस्तस्यैव विनि
तीयते॥ वाक्येनोपकारं निर्वर्त्येति कर्तव्यतावैकृतभावेनेतिकर्तव्यताकांक्षायाः प्रकरणत्वनिरासाय निर्वर्त्येत्युक्तं॥ सा
शब्दवाक्यसमर्पितांगोपकारानिवर्त्यैवेति नातिप्रसंगः॥ इतिकर्तव्यतापदं करणाकांक्षायाः प्रकरणत्व[illegible]वरणाय॥ त
॥ महाप्रकरणमवांतरप्रकरणं च॥ तत्र फलभावनायाः प्रकरणमाद्यं॥ यथा दर्शपूर्णमासप्रकरणे श्रूयते॥ समिधो यज
तं यजतीत्यादि॥ तेषां च फलसाधा[illegible]स्योपकार्याकांक्षा॥ कृतोप्यस्ति कथमित्युपकारकाकांक्षा॥ तेनोभयोः साकांक्षत्वा
॥ क्यत्वं॥ तथा हि॥ यागेन स्वर्गं कुर्यादिति॥ फलवाक्यार्थः॥ तत्र न ज्ञायते यागेन हि केन प्रकारेण स्वर्गः कर्तव्य इति प्रका
कांक्षा॥ ततश्चोपकार्याकांक्षोपेतास्समिधो यजतीत्यादिवचनादेवं जायते अयमस्य व्यापारो येन यागात् स्वर्गो भवतीति संभव
॥ च समिदादिक्रियाणां यागोपकारकत्वमदृष्टद्वारा॥ अवघातादिसन्निपत्योपकारकाणां तु दृष्टद्वारकमेवेति उक्तमधस्तात्॥ यद्य
कुः॥ अतः प्रधानवाक्यस्य प्रकाराकांक्षितावशात्॥ पक्षाकांक्षं प्रयाजादि तदंगत्वं प्रपद्यत इति॥ अंगभावनायाः प्रकरणं द्वितीयं
॥ यथा॥ दर्शपूर्णमासयोः प्रयाजादिसमीपे श्रूयते॥ अभिक्रामं जुहोतीति॥ तत्रावांतरप्रकरणात् प्रयाजांगमागमभिक्र
मणं॥ ननु प्रधानफलभावनायां कथंभावाकांक्षायां तत्प्रकरणस्थानि सर्वाण्यपि प्रधानमेवानुसरंति॥ अन्यथा तेषां मिथो
गाभिभावापत्त्या व्यवस्थितशास्त्रार्थापत्तिरिति चेद्द चेदेवं॥ यद्यंगानामवांतरप्रकरणं न स्यात्॥ अस्ति चावांतरप्रकरणं क १७

वेषत्र संदंशः॥ तथाहि प्रयाजान्विधाय समानयत उपभृतउपभृत इत्यादिगुणान्विधायाभिक्रामंजुहोतीत्युक्त्वा योवै
प्रयाजानांमिथुनंवेद ससमिद्धो वन्हीरिच यजतीत्यादियावत्प्रयाजानिष्ठाद्धवींष्यभिघारयतीति प्रयाजपरामर्शभूतमेतावतात्र
देशो न प्रयाजाः समाप्यत इत्संचगमात्॥ तन्मध्यपतितमभिक्रमणं लदतिक्रमेण नान्यत्र गच्छति॥ भवति चांगभावनायामपि भा
वनासाम्येनाविज्ञातप्रकारत्वात्कथमित्याकांक्षा॥ यत्रवचनसंदंशास्तत्रसत्स्वपि कथंभावेन विनियोजकः॥ सर्वेषामपीति॥ फलत्वेनकः
